# Banakritam 1 Shiva Stotram

# बाणकृतं १ शिवस्तोत्रम्

## Document Information

Text title : Banakritam 1 Shiva Stotram

File name : bANakRRitaM1shivastotram.itx

Category : shiva, shivapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : shivapurANa | rudrasaMhitA | yuddhakhaNDa | adhyAya 56/21-30||

Latest update : February 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 10, 2025

*sanskritdocuments.org*

# बाणकृतं १ शिवस्तोत्रम्

बाण उवाच ।
देवदेव महादेव शरणागतवत्सल ।
त्वां नमामि महेशान दीनबन्धो दयानिधे ॥ २१॥

कृता मयि कृपातीव कृपासागर शङ्कर ।
गर्वोऽपहारितस्सर्वः प्रसन्नेन मम प्रभो ॥ २२॥

त्वं ब्रह्म परमात्मा हि सर्वव्याप्यखिलेश्वरः ।
ब्रह्माण्डतनुरुग्रेशो विराट् सर्वान्वितः परः ॥ २३॥

नाभिर्नभोऽग्निर्वदनमम्बु रेतो दिशः श्रुतिः ।
द्यौश्शीर्षमङ्घ्रिरुर्वी ते मनश्चन्द्रस्तव प्रभो ॥ २४॥

दृगर्को जठरं वार्द्धिर्भुजेन्द्रो धिषणा विधिः ।
प्रजापतिर्विसर्गश्च धर्मो हि हृदयं तव ॥ २५॥

रोमाण्यौषधयो नाथ केशा जलमुचस्तव ।
गुणास्त्रयस्त्रिनेत्राणि सर्वात्मा पुरुषो भवान् ॥ २६॥

ब्राह्मणं ते मुखं प्राहुर्बाहुं क्षत्रियमेव च ।
ऊरुजं वैश्यमाहुस्ते पादजं शूद्रमेव च ॥ २७॥

त्वमेव सर्वदोपास्यस्सर्वैर्जीवैर्महेश्वर ।
त्वां भजन्परमां मुक्तिं लभते पुरुषो ध्रुवम् ॥ २८॥

यस्त्वां विसृजते मर्त्य आत्मानं प्रियमीश्वरम् ।
विपर्ययेन्द्रियार्थार्थं विषमत्त्यमृतं त्यजन् ॥ २९॥

विष्णुर्ब्रह्माऽथ विबुधा मुनयश्चामलाशयाः ।
सर्वात्मना प्रपन्नास्त्वां शङ्करं प्रियमीश्वरम् ॥ ३०॥

इति शिवपुराणे रुद्रसंहितायां युद्धखण्डे

षट्पञ्चाशत्तमाध्यायान्तर्गतं बाणकृतं शिवस्तोत्रं
समाप्तम् ।

शिवपुराण । रुद्रसंहिता । युद्धखण्ड ५ । अध्याय ५६/२१-३० ॥

shivapurANa . rudrasaMhitA . yuddhakhaNDa 5 . adhyAya 56/21-30..

Proofread by PSA Easwaran

*Banakritam 1 Shiva Stotram*

pdf was typeset on February 10, 2025

Please send corrections to *sanskrit@cheerful.com*